भज गॊविन्दं भज गॊविन्दं
गॊविन्दं भज मूढमतॆ ।
संप्राप्तॆ सन्निहितॆ कालॆ
नहि नहि रक्षति डुक्रिन्करणॆ ॥ १ ॥
मूढ जहीहि धनागमतृष्णां
कुरु सद्बुद्धिम मनसि वितृष्णाम ।
यल्लभसॆ निज कर्मॊपात्तं
वित्तं तॆन विनॊदय चित्तम ॥ २ ॥
नारी स्तनभर नाभीदॆशं
दृष्ट्वा मा गा मॊहावॆशम ।
ऎतन्मांस वसादि विकारं
मनसि विचिन्तया वारं वारम ॥ ३ ॥
नळिनी दळगत जलमति तरळं
तद्वज्जीवित मतिशय चपलम ।
विद्धि व्याध्यभिमान ग्रस्तं
लॊकं शॊकहतं च समस्तम ॥ ४ ॥
यावद-वित्तॊपार्जन सक्तः
तावन-निजपरिवारॊ रक्तः ।
पश्चाज्जीवति जर्जर दॆहॆ
वार्तां कॊपि न पृच्छति गॆहॆ ॥ ५ ॥
यावत-पवनॊ निवसति दॆहॆ

www.yousigma.com

तावत-पृच्छति कुशलं गॆहॆ ।
गतवति वायौ दॆहापायॆ
भार्या बिभ्यति तस्मिन कायॆ ॥ ६ ॥
बाल स्तावत क्रीडासक्तः
तरुण स्तावत तरुणीसक्तः ।
वृद्ध स्तावत-चिन्तामग्नः
परमॆ ब्रह्मणि कॊपि न लग्नः ॥ ७ ॥
का तॆ कान्ता कस्तॆ पुत्रः
संसारॊयमतीव विचित्रः ।
कस्य त्वं वा कुत आयातः
तत्वं चिन्तय तदिह भ्रातः ॥ ८ ॥
सत्सन्गत्वॆ निस्सन्गत्वं
निस्सन्गत्वॆ निर्मॊहत्वम ।
निर्मॊहत्वॆ निश्चलतत्त्वं
निश्चलतत्त्वॆ जीवन्मुक्तिः ॥ ९ ॥
वयसि गतॆ कः कामविकारः
शुष्कॆ नीरॆ कः कासारः ।
क्षीणॆ वित्तॆ कः परिवारः
ग्न्यातॆ तत्त्वॆ कः संसारः ॥ १० ॥
मा कुरु धनजन यौवन गर्वं
हरति निमॆषात-कालः सर्वम ।

www.yousigma.com

मायामयमिदम-अखिलं हित्वा
ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ११ ॥
दिन यामिन्यौ सायं प्रातः
शिशिर वसन्तौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुः
तदपि न मुन्चत्याशावायुः ॥ १२ ॥
द्वादश मंजरिकाभिर शॆषः
कथितॊ वैया करणस्यैषः ।
उपदॆशॊ भूद-विद्या निपुणैः
श्रीमच्छंकर भगवच्छरणैः ॥ १३ ॥
का तॆ कान्ता धन गत चिन्ता
वातुल किं तव नास्ति नियन्ता ।
त्रिजगति सज्जन सन्गतिरॆका
भवति भवार्णव तरणॆ नौका ॥ १४ ॥
जटिलॊ मुण्डी लुन्जित कॆशः
काषायान्बर बहुकृत वॆषः ।
पश्यन्नपि च न पश्यति मूढः
उदर निमित्तं बहुकृत वॆषः ॥ १५ ॥
अन्गं गलितं पलितं मुण्डं
दशन विहीनं जातं तुण्डम ।
वृद्धॊ याति गृहीत्वा दण्डं

तदपि न मुन्चत्याशा पिण्डम ॥ १६ ॥
अग्रॆ वह्निः पृष्ठॆ भानुः
रात्रौ चुबुक समर्पित जानुः ।
करतल भिक्षस-तरुतल वासः
तदपि न मुन्चत्याशा पाशः ॥ १७ ॥
कुरुतॆ गन्गा सागर गमनं
व्रत परिपालनम-अथवा दानम ।
ग्न्यान विहीनः सर्वमतॆन
भजति न मुक्तिं जन्म शतॆन ॥ १८ ॥
सुरमन्दिर तरु मूल निवासः
शय्या भूतलम-अजिनं वासः ।
सर्व परिग्रह भॊगत्यागः
कस्य सुखं न करॊति विरागः ॥ १९ ॥
यॊगरतॊ वा भॊगरतॊ वा
सन्गरतॊ वा सन्गविहीनः ।
यस्य ब्रह्मणि रमतॆ चित्तं
नन्दति नन्दति नन्दत्यॆव ॥ २० ॥
भगवद्गीता किन्चिदधीता
गन्गा जललव कणिका पीता ।
सकृदपि यॆन मुरारी समर्चा
क्रियतॆ तस्य यमॆन न चर्चा ॥ २१ ॥

www.yousigma.com

पुनरपि जननं पुनरपि मरणं
पुनरपि जननी जठरॆ शयनम ।
इह संसारॆ बहु दुस्तारॆ
कृपयापारॆ पाहि मुरारॆ ॥ २२ ॥
रथ्या चर्पट विरचित कन्थः
पुण्यापुण्य विवर्जित पन्थः ।
यॊगी यॊग नियॊजित चित्तः
रमतॆ बालॊन्मत्तवदॆव ॥ २३ ॥
कस्त्वं कॊहं कुत आयातः
का मॆ जननी कॊ मॆ तातः ।
इति परिभावय निज संसारं
सर्वं त्यक्त्वा स्वप्न विचारम ॥ २४ ॥
त्वयि मयि सर्वत्रैकॊ विष्णुः
व्यर्थं कुप्यसि मय्यसहिष्णुः ।
भव समचित्तः सर्वत्र त्वं
वान्छस्यचिराद-यदि विष्णुत्वम ॥ २५ ॥
शत्रौ मित्रॆ पुत्रॆ बंधौ
मा कुरु यत्नं विग्रह सन्धौ ।
सर्वस्मिन्नपि पश्यात्मानं
सर्वत्रॊत-सृज भॆदाग्न्यानम ॥ २६ ॥
कामं क्रॊधं लॊभं मॊहं

www.yousigma.com

त्यक्त्वात्मानं पश्यति सॊहम ।
आत्मग्न्य्नान विहीना मूढाः
तॆ पच्यन्तॆ नरक निगूढाः ॥ २७ ॥
गॆयं गीता नाम सहस्रं
ध्यॆयं श्रीपति रूपम-अजस्रम ।
नॆयं सज्जन सन्गॊ चित्तं
दॆयं दीनजनाय च वित्तम ॥ २८ ॥
सुखतः क्रियतॆ रामाभॊगः
पश्चाद्धन्त शरीरॆ रॊगः ।
यद्यपि लॊकॆ मरणं शरणं
तदपि न मुन्चति पापाचरणम ॥ २९ ॥
अर्थमनर्थं भावय नित्यं
नास्ति ततः सुख लॆशः सत्यम ।
पुत्रादपि धनभाजां भीतिः
सर्वत्रैषा विहिता रीतिः ॥ ३० ॥
प्राणायामं प्रत्याहारं
नित्यानित्य विवॆक विचारम ।
जाप्यसमॆत समाधि विधानं
कुर्व वधानं महद-अवधानम ॥ ३१ ॥
गुरु चरणाम्भुज निर्भरभक्तः
संसाराद-अचिराद-भव मुक्तः ।

www.yousigma.com

सॆन्दिय मानस नियमादॆवं
द्रक्ष्यसि निज हृदयस्थं दॆवम ॥ ३२ ॥
मूढः कश्चिन वैयाकरणॊ
डुकृण्करणाध्ययन धुरीणः ।
श्रीमच्छंकर भगवच्चिष्यैः
बॊधित आसीच्छॊदित करणैः ॥ ३३ ॥

www.yousigma.com